National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2025;** 1(62): 62-64
© 2025 NJHSR
www.sanskritarticle.com

**अमित कुमार धर दुबे**
सहायक प्राध्यापक – संस्कृत,
किरोड़ीमल शासकीय कला एवं विज्ञान-महाविद्यालय रायगढ़, जिला - रायगढ़, छत्तीसगढ़, पिन 496001

**Correspondence:**
**अमित कुमार धर दुबे**
सहायक प्राध्यापक – संस्कृत,
किरोड़ीमल शासकीय कला एवं विज्ञान-महाविद्यालय रायगढ़, जिला - रायगढ़, छत्तीसगढ़, पिन 496001

# अचिन्त्यभेदाभेददर्शनस्य सिद्धान्तसारः

**अमित कुमार धर दुबे**

**प्रवृत्तिबीजम् -**

श्रीमद्भगवद्गीतोक्तो भगवान् श्रीकृष्ण एव सच्चिदानन्दस्वरूपः श्रीचैतन्यदेवः। श्रीकृष्णचैत-न्यमहाप्रभुः श्रीमद्भगवद्गीतोक्तमतं माध्वाचार्यप्रणीतपूर्णप्रज्ञभाष्योक्तमतञ्च स्वीयमतरूपेणाङ्गीकृत्य लोकशिक्षां प्रददाति स्म। श्रीकृष्णचैतन्यमहाप्रभोर्मतमिदं प्रतिष्ठापयितुं पूज्यपादबलदेवविद्याभूषणाचार्यैरुप-निषच्छ्रीमद्भगवद्गीताब्रह्मसूत्रादीनामुपरि प्रणीतं भाष्यं गोविन्दभाष्यनाम्ना प्रख्यातम्। अस्मिन्गोविन्दभाष्ये प्रतिपादितं तत्त्वमेवाचिन्त्यभेदाभेददर्शननाम्ना प्रसिद्धमस्ति।

अस्मिन्शास्त्रे त्रिविधाऽधिकारिणो भवन्ति। स्वर्गादिलोकान्प्राप्तीच्छुस्सन्स्वधर्मांश्चाऽऽचरति स सनिष्ठोऽधिकारी। लोकसङ्ग्रहार्थं हर्य्यर्चनादिरूपान्धर्मानाचरन् हरौ भक्तिनिरत आश्रमविहितः परिनिष्ठितोऽधिकारी। जपस्तपादिभिः शुद्धसत्त्व एकस्मिन् हरौ एव भक्तिसम्पन्नो निराश्रमो निरपेक्षः अधिकारी। एतदेव बलदेवविद्याभूषणाचार्यैर्गीताभूषणभाष्ये उच्यते यत्- अस्य शास्त्रस्य श्रद्धालुः सद्धर्मनिष्ठो विजितेन्द्रियोऽधिकारी। स च सनिष्ठपरिनिष्ठितनिरपेक्षभेदात् त्रिविधः– **तेषु स्वर्गादिलोका-न्दिदृक्षुर्निष्ठया स्वधर्मान् हर्य्यर्चनरूपानाचरन् प्रथमः, लोकसंजिघृक्षया तानाचरन् हरिभक्तिनिरतो द्वितीयः, स च आश्रमः, सत्य-तपो-जपादिभिर्विशुद्धचित्तो हर्य्येकनिरतस्तृतीयो निराश्रमः इति।**[1] अस्मिन् श्रीकृष्णचैतन्यस्तत्स्वरूपप्रतिपादकशास्त्रयोर्वाच्यावाचकभावः। श्रीकृष्णैव एवात्र विषयः। अशेषदुःखनि-वृत्तिपूर्वकन्तत्साक्षात्कारोऽत्र प्रयोजनम्। श्रीकृष्णचैतन्य एवोपनिषत्सु प्रतिपादितं परं ब्रह्म। तदेव कृष्णदासकविराजाचार्यैरुच्यते यत्—

**यदरीणां प्रियाणाञ्च प्राप्यमेकमिवोदितम्।**
**तद्ब्रह्मकृष्णयोरैक्यात् किराणार्कोपमाजुषोः॥**[2]

शक्तिशक्तिमतोरंशांशिनोश्चैकत्वादीश्वरतच्छक्तिस्वरूपजीवयोरभेदे सत्यपि जीवस्याणुपरिमाणत्व-परमेश्वरनियम्यत्वादिकारणाच्च तयोर्भेदोऽपि विद्यते। परमेश्वरस्याचिन्त्यशक्तिप्रभावादिमौ भेदाभेदौ वर्तेते। अस्मिन्नयेऽङ्गीकृतेषु पञ्चसु पदार्थेषु परमेश्वरजीवप्रकृतिकालाश्च चत्वारो नित्याः, अदृष्टादिनाम्ना चाभिहितं कर्माऽनित्यम्। जीवादिचतुष्टयमीश्वरस्य शक्तिरूपम्। परमात्माधीनोऽपराशक्तिविशिष्टो जीवो ब्रह्मण एकदेशः आत्मभिन्नोऽणुपरिमाणो ज्ञानज्ञातृस्वरूप उत्पत्तिविनाशरहितस्सत्त्वरजस्तमोगुणयुक्तः कर्तृत्वभो-क्तृत्वस्वरूपश्च। जीवस्यांशतवात्मभिन्नत्वनित्यत्वपरतन्त्रादिषु यथा सुदीप्तात्पावकाद्विस्फु-लिङ्गाः[3], सोऽन्वेष्ट-व्यः स विजिज्ञासितव्यः[4], एतमेव विदित्वा मुनिर्भवति[5], न जीवो म्रियते[6], तत्त्वमसि[7] चेत्याद्याः श्रुतयोऽत्रच मानानि भजन्ते।

अनन्तकल्याणनित्यज्ञानानन्दादिगुणयुक्तोऽचिन्त्यशक्तिमान्सच्चिदानन्दस्वरूपस्स्वतन्त्रो विभुरचिन्त्य-शक्तिरूपमायाधर्मैरस्पृष्ट उत्पत्तिनाशरहितो निराकारश्च पुरुषोत्तमः श्रीकृष्ण एव जगत्कारणमित्यचि-न्त्यभेदाभेदवादिनो वदन्ति। बलदेवविद्याभूषणाचार्यैर्गीताभूषणभाष्ये उच्यते, अथ सुखचिद्घनस्स्वयं भगवान्नचिन्त्यशक्तिः पुरुषोत्तमः स्वसङ्कल्पायत्तविचित्रजगदुदयादिर्विरिञ्च्यादिसंचिन्त्यचरणस्स्व-जन्मादि-लीलया स्वतुल्यान्सहाविर्भूतान्पार्षदान्प्रहर्षयंस्तथैव जीवान्बहूनविद्याशादर्दूलीवदनाद्विमुच्य

स्वान्तर्धानोत्तर-भाविनोऽन्यानुद्दिधीर्षुराहवमूर्द्धि स्वात्मभूतमप्यर्जुनमवितर्क्य स्वशक्त्या समोहमिव कुर्वन्तन्मोहवि-मार्जनोपदेशेन सपरिकरस्वात्मयाथात्म्यैकनिरूपिकां स्वगीतोपनिषदमुपादिशत्। तस्यां खल्वीश्वर-जीवप्रकृतिकालकर्माणि पञ्चार्थाः वर्ण्यन्ते। तेषु विभुस्संविदीश्वरः, अणुसंविज्जीवः, सत्त्वादिगुणत्रयाश्रयो द्रव्यं प्रकृतिः, त्रैगुण्यशून्यं जडद्रव्यं कालः, पुंप्रयत्ननिष्पाद्यमदृष्टादि-शब्दवाच्यं कर्मेति तेषां लक्षणानि। एष्वीश्वरादीनि चत्वारि नित्यानि। जीवादीनि त्वीशवश्यानि। कर्म तु प्रागभाववदनादि विनाशि च। तत्र संवित्स्वरूपोऽपीश्वरो जीवश्च संवेत्ता स्मदर्थश्च। विज्ञानमानन्दं ब्रह्म, यस्सर्वज्ञस्सर्ववित्, मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष इत्यादिश्रुतिभ्य इति।[8]

भोगापवर्गप्रदाता परमेश्वरो निराकारस्सन्नपि लोकानुग्रहार्थ-मवताररूपेण भुव्यवतरति। अवतारस्त्रिविधः। अंशावतारः गुणावतारः, शास्त्रवेशावतारश्चेति। पुरुषावतारो लीलावतारश्चेति द्विविधोऽशांवतारः। पुरुषावतारो नारायणो लीलावताराश्च मत्स्यकूर्मादयः। ब्रह्मविष्णुमहेश्वराः गुणावताराः। सनकसनातन-व्यासादयः शक्यावेशावताराः। पराक्षेत्रज्ञाख्यपराविद्याकर्मशक्ति-त्रयप्रभावात्परमेश्वरो जगतोऽभिन्ननिमित्तोपादानकारणं भवति। एतच्छक्तिविषये विष्णुपुराणे उच्यते यत्–

**विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापराः।**
**अविद्याकर्मसंज्ञाऽन्या तृतीयाशक्तिरिष्यते॥**[9]

परमेश्वरप्रत्यक्षत्वे यज्ञदानतपश्शमदमादयो भक्तिवैराग्यज्ञाना-दीनि च साधनानि भवन्ति। तेषाञ्च साधनत्वे तमेतं वेदानुवचनेन यज्ञेन[10], मयि चानन्ययोगेन भक्तिरव्यभिचारिणी[11], मत्प्रसादा-दवाप्नोति शाश्वतं पदमव्ययम्[12], ईन्द्रियार्थेषु वैराग्यमनहङ्कार एव च[13], सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्[14], अपि च संराधने प्रत्यक्षा-नुमानाभ्यां[15] चेत्यादीनि श्रुतिस्मृतिन्यायप्रस्थानानि मानानि भजन्ते।

विचार्यमाणे सत्यस्मिन्नेय मुक्तिः षड्विधा। सालोक्यमुक्तिः सार्ष्टिमुक्तिः सारूप्यमुक्तिः सामीप्यमुक्तिः सायुज्यमुक्तिः श्रीकृष्ण-साक्षात्काररूपा परा मुक्तिश्चेति। परमात्मना सहैकस्मिन्नेव लोके निवासः सालोक्यमुक्तिः। भगवत्समानैश्वर्यप्राप्तिः सार्ष्टिमुक्तिः। यथा जलेषु स्थितमपि पद्मपत्रं जलेन न युज्यते तथैव प्रकृतिस्थोऽपि ईश्वरः प्रकृतिस्थैर्गुणैः कदापि न युज्यते इत्येतदेवेश्वरस्यैश्वर्यम्। एतदेव श्रीमद्भागवते चोच्यते—

**एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः।**
**न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रयाः॥**[16]

भगवन्निकटवर्तित्वप्राप्तिः सामीप्यमुक्तिः। भगवत्समानरूपत्वप्राप्तिः सारूप्यमुक्तिः। भगवदेकत्व-प्राप्तिः सायुज्यमुक्तिः। सायुज्यमुक्तावेव निर्विशेषब्रह्मप्राप्तिस्सम्भवति। भगवद्भक्ताः भगवत्सेवां विना एतन्मुक्तिपञ्चकं प्रदीयते चेदपि न गृह्णन्ति। एतदेव कृष्णदासकविराजाचार्यैर्भण्यते यत्-

**सालोक्यसार्ष्टिसारूप्यसामीप्यैक्यत्वमुच्यते।**
**दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥**[17]

अद्वैतवेदान्ते यथा निर्विशेषब्रह्मानुभव एव मुक्तेश्चरमः पर्यायो न तथाऽचिन्त्यभेदाभेददर्शने। निर्विशेषब्रह्मानुभवाच्छ्रीकृष्णचैतन्यसाक्षात्कारजनित आनन्दोऽधिक उत्कृष्टः। एषा एव मुख्या मुक्तिः। कृष्णदासकविराजाचार्यैः हरिभक्तिसुधोदयग्रन्थाच्चैतन्यचरितामृते श्लोकोऽयमुदाह्रियते यच्च—

**त्वत्साक्षात्करणह्लादविशुद्धाब्धि स्थितस्य मे।**
**सुखानि गोष्पदायन्ते ब्राह्म्याण्यपि जगद्गुरोः॥**[18]

सालोक्यादिपञ्चविधायां मुक्तौ मायाऽपगता भवति चेदपि कृष्णसेवालाभार्थं कृष्णभक्तिरेव मूलं प्रयोजनम्। पञ्चविधमुक्तौ कृष्णभक्तिस्तु नान्तर्भवति। मोक्षेच्छया कृष्णभक्तिस्तिरोहिता भवति। मोक्षं लब्धवतः पुरुषस्य सोऽहं ब्रह्म इत्येवं भावस्तिष्ठति। अतस्तस्य हृदये कृष्णभक्तिस्तु नैव तिष्ठति। अतो मोक्षेच्छाऽपि कैतवप्रधानेति चैतन्यचरितामृतकारस्य मतम्। कृष्णदासकविरा-जाचार्यैः श्रीमद्भागवतग्रन्था-च्चैतन्यचरितामृते श्लोकोऽयमुदाह्रियते यच्च—

**धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां**
**वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।**
**श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः**
**सद्यो हृद्यवरुद्धस्तेऽत्र कृतिभिः श्रुश्रुषुभिस्तत्क्षणात्॥**[19]

अस्य श्लोकस्य व्याख्यानावसरे श्रीधरस्वामिभिरुच्यते यत्—

**उज्झितकैतवः फलानुसन्धानरहितः।**
**प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः॥**[20]

एतेनाऽद्वैतिनो निन्दिता भवन्ति। श्रीकृष्णभक्तिरेवाऽमृतत्वं प्रददाति। अत एव श्रीमद्भागवते उच्यते यथा—

**मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते।**
**दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः॥**[21]

श्रीकृष्णचरणप्राप्तिरेव मुख्या मुक्तिः, तस्याञ्च ब्राह्मणक्षत्रियादि-भेदेनाऽऽनन्दोत्कर्षाकर्षतारतम्यं भवतीत्यचिन्त्यभेदाभेददर्शनस्य सिद्धान्त इति शम्।

**निष्कर्षः –**

महाप्रभुः श्रीचैतन्यदेवः (१४८५-१५३३ ई.) अनन्तगुणनिधानं सच्चिदानन्दं श्रीकृष्णं परब्रह्मत्वेन अङ्गीकरोति। ब्रह्म भेदातीतम्। किन्तु स्वशक्त्या असौ जीवजगद्रूपेण आविर्भवति। असौ श्रीकृष्णाख्यं परब्रह्म जगतोऽस्य निमित्तं शक्त्यंशेन उपादानञ्च। जीवः अनन्तः अणुरूपश्च। जीवः तस्य तटस्थाख्यशक्तिः। यथा किरणवल्याः आधारः सूर्य्यः तथा सम्पूर्णजीवसमुदायस्य ब्रह्म। संसारः तस्यैव प्रकाशः इत्यतः मिथ्यारूपो नास्ति। अभिलाषान् सर्वान् उत्सृज्य कृष्णस्य

भगवतः अनुसेवनमेव भक्तिः। वेदशास्त्रानुमोदितमार्गेण ईश्वरभक्तिः सम्भवति। क्रमशः एषा भक्तिः रागानुगुणा भवति।

भगवत्सेवानुकूलाभक्तिः पञ्चधा विभज्यते – शान्त-दास्य-सख्य-वात्सल्य-माधुर्यभेदैः। तत्र माधुर्यरूपायाः भक्तेः सर्वोत्कृष्टत्वेन तदाशयभूतानां श्रीराधादीनां प्रेमसेवायामपि सर्वोत्कर्षत्वमनायासं वरीवर्ति। मायाख्या प्रकृतिः भगवदिच्छया निखिलमिदं वैचित्र्यं चकर्ति। तथा च –

**मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्[22] इति।**

**पितामहस्य जगतो माता धाता पितामहः[23] इति।**

एवञ्च भाष्येऽस्मिन् सिद्धान्तगतानि सर्वाण्यपि तथ्यानि याथातथ्येन सुविन्यस्तानि विद्यन्ते। महाप्रभोः देवस्य श्रीचैतन्यचन्द्रस्य सन्दर्भेऽस्मिन् इदमभिमतम् –

**आराध्यो भगवान् व्रजेशतनयस्तद्धाम वृन्दावनं**
**रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता।**
**श्रीमद्भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्**
**श्रीचैतन्यमहाप्रभोर्मतमिदं तत्रादरो नापरः॥**

एवमेव गोविन्दाभिधे मोक्षभाष्ये बलदेवविद्याभूषणस्वामिभिः स्वाभिलषितं प्रकटीकृतम्।

**ग्रन्थसूची**


- श्रीमद्भगवद्गीता. शाङ्करभाष्याद्येकादशटीकोपेता, प्रथमः भागः. संशोधकः-'साधले' इत्युपाह् शम्भुजनुर्गजाननशर्मा दिल्ली पब्लिकेशन्स, (2014Third Edition)।
- श्रीमद्भगवद्गीता.श्रीपादविश्वनाथचक्रवर्तिमहोदयविरचितसारार्थ-वर्षिणीटीकया एवं श्रीयुतबलदेव विद्याभूषणमहोदयविरचित-गीताभूषणभाष्येण सङ्लङ्ककृता. प्रकाशकः-कृष्णदासबाबा. मथुरा- राधाकुण्ड, कुसुमसरोवर, २०२३।
- श्रीमद्भगवद्गीता. श्रीरामानुजभाष्यअनुवादसहित-हिन्दी-. अनुवादकः- श्रीहरिकृष्णदास गोयेन्दका. गोरखपुर गीताप्रेस (प्रकाशक एवं मुद्रक), सं२०६४-.।
- श्रीमद्भर्तृहरिः. वाक्यपदीयम्. हिन्दीभाषया व्याख्याकारः सम्पादकश्च- विद्यावाचस्पति प्रोफेसर्हरिनारा-यण तिवारी. वाराणसी , चौखम्बा संस्कृत सीरीज आफिस, वि.स.-२०७२
- श्रीमद्भागवतपुराणम्. श्रीधरस्वामिविरचितया भावार्थबोधि-नीनाम्ना संस्कृतटीकया समुपेतम्. संस्कृता-आचार्यजगदीश-लालशास्त्री. दिल्ली, मोतीलाल बनारसीदास, १९८८।
- श्रीमन्महर्षि-वेदव्यासः. विष्णुपुराणम् (बङ्गपुस्तकम्). सम्पादकः- आचार्यपञ्चाननतर्करत्नः.कोलकाता,नवभारत-पावलिशार्स, १३९० (बङ्गाब्दः)।
- श्वेताश्वतरोपनिषद्. व्याख्याकारः अनुवादकश्च-स्वामी विश्वरूपानन्दसरस्वती. मुम्बई, सत्साहित्यट्रस्ट-प्रकाशन-, २००८ (द्वितीय-संस्करणम्, जानुयारिमासः)।
- सदानन्दयोगीन्द्रः. वेदान्तसारः (बङ्गपुस्तकम्). सम्पादकः विपद्भञ्जनपालः. कलकाता, संस्कृतपुस्त- कभाण्डारः, २०१० (नवमसंस्करणम्)।
- सर्वज्ञत्वात्ममुनिः.संक्षेपशारीरकम्.पञ्चप्रक्रियासहित-श्रीस्वामिरा-मानन्दकृत-भावदीपिका-हिन्दीव्य-ख्यासहितम्.सम्पादकः- स्वामी योगीन्द्रानन्दः. वाराणसी , चौखम्बा विद्याभवन, १९८७।
- सुरेश्वरः. नैष्कर्म्यसिद्धिः. व्याख्याकारः- स्वामी प्रज्ञानानन्दसर-स्वती.वाराणसी,दक्षिणामूर्तिप्रकाशनम्-मठ-, २०६६ (वैकमाब्दः, द्वितीयसंस्करणम्)।


**पाद टिप्पणी : -**

[1]श्री.गी. (गी.भू.भा.सा.), पृ.५-६

[2]चै.चरि. – १.५.५

[3]मु.उ.- २.१.१

[4]छा.उ.- ८.७.१

[5]बृ.उ.- ४.२.२२

[6]छा.उ.- ६.११.३

[7]तत्रैव ६.८.७

[8]श्री.गी. (गी.भू.भा.सा.), पृ.-६

[9]विष्णु.पु.-६.७.६१

[10]बृ.उ.४.४.२२

[11]श्री.गी.१३.१०

[12]तत्रैव.१८.५६

[13]तत्रैव.१३.८

[14]ब्र.सू.३.४.२६

[15]तत्रैव.३.२.२४

[16]श्री.भा.पु- १.११.३८

[17]चै.चरि.- १.४.३६

[18]चै.चरि.- १.७.५

[19]तत्रैव.- १.१.३७

[20]तत्रैव.- १.१.३८

[21]श्री.भा.पु- १०.८२.४५

[22]श्रीमद्भगवद्गीता १४।३

[23]श्रीमद्भगवद्गीता ९।१७